श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे

# ॥ त्रिषष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रिषष्टितमः सर्गः ॥

## सम्पातेर्नवपुङ्खोद्गमस्तस्य वानराणां प्रोत्साहनं कृत्वा तत उड्डयनं वानराणां ततो दक्षिणस्यां प्रस्थानं च

एतैरन्यैश्च बहुभिर्वाक्यैर्वाक्यविशारदः।
मां प्रशस्याभ्यनुज्ञाप्य प्रविष्टः स स्वमालयम्॥ **4.63.1** ॥

कन्दरात् तु विसर्पित्वा पर्वतस्य शनैः शनैः।
अहं विन्ध्यं समारुह्य भवतः प्रतिपालये॥ **4.63.2** ॥

अद्य त्वेतस्य कालस्य वर्षं साग्रशतं गतम्।
देशकालप्रतीक्षोऽस्मि हृदि कृत्वा मुनेर्वचः॥ **4.63.3** ॥

महाप्रस्थानमासाद्य स्वर्गते तु निशाकरे।
मां निर्दहति सन्तापो वितर्कैर्बहुभिर्वृतम्॥ **4.63.4** ॥

उदितां मरणे बुद्धिं मुनिवाक्यैर्निवर्तये।
बुद्धिर्या तेन मे दत्ता प्राणानां रक्षणे मम॥ **4.63.5** ॥

सा मेऽपनयते दुःखं दीप्तेवाग्निशिखा तमः।
बुध्यता च मया वीर्यं रावणस्य दुरात्मनः॥ **4.63.6** ॥

पुत्रः सन्तर्जितो वाग्भिर्न त्राता मैथिली कथम्।
तस्या विलपितं श्रुत्वा तौ च सीतावियोजितौ॥ **4.63.7** ॥

न मे दशरथस्नेहात् पुत्रेणोत्पादितं प्रियम्।
तस्य त्वेवं ब्रुवाणस्य संहतैर्वानरैः सह॥ **4.63.8** ॥

उत्पेततुस्तदा पक्षौ समक्षं वनचारिणाम्।
स दृष्ट्वा स्वां तनुं पक्षैरुद्गतैररुणच्छदैः॥ **4.63.9** ॥

प्रहर्षमतुलं लेभे वानरांश्चेदमब्रवीत्।
निशाकरस्य राजर्षेः प्रसादादमितौजसः॥ **4.63.10** ॥

आदित्यरश्मिनिर्दग्धौ पक्षौ पुनरुपस्थितौ।
यौवने वर्तमानस्य ममासीद् यः पराक्रमः॥ **4.63.11** ॥

तमेवाद्यावगच्छामि बलं पौरुषमेव च।
सर्वथा क्रियतां यत्नः सीतामधिगमिष्यथ॥ **4.63.12** ॥

पक्षलाभो ममायं वः सिद्धिप्रत्ययकारकः।
इत्युक्त्वा तान् हरीन् सर्वान् सम्पातिः पतगोत्तमः॥ **4.63.13** ॥

उत्पपात गिरेः शृङ्गाज्जिज्ञासुः खगमो गतिम्।
तस्य तद् वचनं श्रुत्वा प्रतिसंहृष्टमानसाः।
बभूवुर्हरिशार्दूला विक्रमाभ्युदयोन्मुखाः॥ **4.63.14** ॥

अथ पवनसमानविक्रमाः
    प्लवगवराः प्रतिलब्धपौरुषाः।
अभिजिदभिमुखां दिशं ययु -
    र्जनकसुतापरिमार्गणोन्मुखाः॥ **4.63.15** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे त्रिषष्टितमः सर्गः॥